कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2336 विषय

नाव अकारादिराम सहस्रनाम

लेखक / लिपीकार

पृठ 21 काळ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ मकारादि राम सहस्त्र नाम.

अथ श्रीमकारादिरामसहस्त्रनामप्रारंभः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥श्रीगणेशशायनमः॥ श्रीरामकुलदेवतायनमः॥ ॥पार्वत्युवाच॥ ॥श्रोतुमिच्छाम्य
हं देव तदहं सर्वकामदं ॥ नाम्नां सहस्रं रामस्य ब्रूहि यद्यस्ति मे दया ॥१॥ श्रीमहादेव उवाच
॥ ॥ अथ वक्ष्यामि ते देवि रामनाम सहस्रकं ॥ शृणु चैकमनास्तोत्रं गुह्याद्गुह्यतरं महत् ॥२॥
ॐ अस्य श्रीरामसहस्रनाममालामंत्रस्य भगवानीश्वर ऋषिरनुष्टुप्छंदः ॥ श्रीराम परमा
त्मा देवता ॥ श्रीमन्महाविष्णुरिति बीजं ॥ गुणभृन्निर्गुणो महानिति शक्तिः ॥ संसारतार
को राम इति मंत्रः ॥ सच्चिदानंदविग्रह इति कीलकं ॥ अक्षयः पुरुषः साक्षीति कवचं ॥ अ
जयः सर्वभूतात्मा इत्यस्त्रं ॥ राजीवलोचनः श्रीमान् इति ध्यानं ॥ श्रीरामप्रीत्यर्थे दिव्य
सहस्रनाम जपे विनियोगः ॥ अथ करन्यासः ॥ श्रीरामचंद्राये अंगुष्ठाभ्यांनमः ॥
सीतापतये इति तर्जनीभ्यांनमः ॥ रघुनाथायेति मध्यमाभ्यांनमः ॥ भरताग्रजायेत्य
नामिकाभ्यांनमः ॥ दशरथात्मजयेति कनिष्ठिकाभ्यांनमः ॥
लकरपृष्ठाभ्यांनमः ॥ अथ हृदयादिन्यासः ॥ श्रीरामचंद्रायेति हृदयायनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम सीतापतये इति शिरसे स्वाहा ॥ रघुनाथाय इति शिखायै वषट् ॥ भरताग्रजायेति कव स॰ ना॰
१ चाय हुं ॥ दशरथात्मजायेति नेत्रत्रयाय वौषट् ॥ हनुमत्प्रभवे इत्यस्त्राय फट् ॥ अथ
ध्यान ॥ विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुं ॥ श्रीरामचंद्रं हरिमादिदेवं
परात्परं राममहं भजामि ॥ १ ॥ तत्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकं ॥ राजाधि
राजं रविमंडलस्थं विश्वेश्वरं राममहं भजामि ॥ २ ॥ ॐ रामः श्रीमान्महाविष्णुर्जि
ष्णुर्देवहितावहः ॥ तत्वात्मा तारकं ब्रह्म शाश्वतः सर्वसिद्धिदः ॥ १ ॥ राजीवलोचनः श्री
मान् श्रीरामो रघुपुंगवः ॥ रामभद्रः सदाचारो राजेंद्रो जानकीपतिः ॥ २ ॥ अग्रगण्यो
वरेण्यश्च वरदः परमेश्वरः ॥ जनार्दनो जितामित्रः परार्थैकप्रयोजनः ॥ ३ ॥ विश्वा-
मित्रप्रियो दांतः शत्रुजिच्छत्रुतापनः ॥ सर्वज्ञः सर्वदेवादिः शरण्यो वालिमर्दनः ॥ ४ ॥ १
ज्ञानभव्योऽपरिच्छेद्यो वाङ्मी सत्यव्रतः शुचिः ॥ ज्ञानगम्यो दृढप्रज्ञः खरध्वंसी प्रता
पवान् ॥ ५ ॥ द्युतिमानात्मवान् वीरो जितक्रोधोऽरिमर्दनः ॥ विश्वरूपो विशालाक्षः प्रभु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिवृढो धिपः ॥६॥ ईशाःखड्गधरः श्रीमान् कौसल्येयोनुसूयकः ॥ विपुलांसो महोरस्क
परमेष्ठीपरायणः ॥७॥ सत्यव्रतः सत्यसंधो गुरुः परम धार्मिकः ॥ लोककर्त्ता लोकबंधुश्च
लोकात्मा लोकसृष्टप्रभुः ॥ अनादिर्भगवान्सेव्यो जितमायो रघूद्वहः ॥ रामो दयाकरो
रोदक्षः सर्वज्ञः सर्व पावनः ॥९॥ ब्रह्मण्यो नीतिमान गोप्ता सर्वदेव प्रियोहरिः ॥ सुंदरः पीत
वासाश्च सूत्रकारः पुरातनः ॥ १०॥ सौम्यो महर्षिः कोदंडी सर्वज्ञः सर्वकोविदः ॥ कवि
सुग्रीववरदः सर्वपुण्याधिकप्रदः ॥११॥ भव्यो जितारिषड्वर्गो महोदारो घनाशनः ॥ स
कीर्तिरादिपुरुषः कांत पुण्यकृतागमः ॥१२॥ अकल्मषश्चतुर्बाहुः सर्वावासो दुरासदः
स्मितभाषी निवृत्तात्मा स्मृतिमान् वीर्यवान्प्रभुः ॥१३॥ धीरो दांतो घनश्याम सर्वयुद्ध
विशारदः ॥ आत्मज्ञो योग निळयः सुमनो लक्ष्मणाग्रजः ॥१४॥ सर्व तीर्थमयः शूरः
सर्वयज्ञ फल प्रदः ॥ यज्ञस्वरूपी यज्ञेशो जरामरणवर्जितः ॥ १५॥ वर्णाश्रमगुरुर्व
र्णी शत्रुजित्पुरुषोत्तमः ॥ शिव लिंग प्रतिष्ठाता परमात्मा परात्परः ॥१६॥ प्रमाणभू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम तो दुर्ज्ञेयः पूर्णः परपुरंजयः ॥ अनंतदृष्टिरानंदो धनुर्वेदो धनुर्धरः ॥ १७ ॥ छ ॥ स॰ ना॰
बाणकरो गुणश्रेष्ठो सच्चिदानंदविग्रहः ॥ अभिवाद्यो महाकायो विश्वकर्मा विशारदः ॥
॥१८॥ विनितात्मा वीतरागस्तपस्वीशो जनेश्वरः ॥ कल्याणप्रकृतिः सर्वसर्वेशः सर्व
२ कामदः ॥१९॥ अक्षरः पुरुषः साक्षी केशवः पुरुषोत्तमः ॥ लोकाध्यक्षो महाकायो वि-
भीषणवरप्रदः ॥ २० ॥ अनंतविग्रहो जातिहनुमत्प्रभुरक्षयः ॥ भ्राजिष्णुः सहनो भोक्ता
सत्यवादी बहुश्रुतः ॥ २१ ॥ सुखदः कारणः कर्ता भवबंधविमोचकः ॥ देवचूडामणिर्नेता
ब्रह्मण्यो ब्रह्मवर्धनः ॥२२॥ संसारतारको रामः सर्वदुःखविमोक्षकृत् ॥ विद्वत्तमो विश्व
कर्ता विश्वहर्ता च विश्वधृक् ॥ २३ ॥ नित्यो नियतकल्याणः सीताशोकविनाशनः ॥
काकुत्स्थः पुंडरीकाक्षो विश्वामित्रभयापहः ॥२४॥ मारीचमथनो रामो विराधव २
धपंडितः ॥ दुःस्वप्ननाशनो रम्यः किरीटी त्रिदशाधिपः ॥२५॥ महाधनुर्महाकायो
भीमो भीमपराक्रमः ॥ तत्वस्वरूपी तत्वज्ञस्तत्ववादी सुविक्रमः ॥ २६ ॥ भूतात्मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूतकृत्स्वामी कालज्ञानी महापटुः ॥ अनिर्विण्णो गुणग्रामो निष्कलंकः कलंकहा ॥
॥ २७ ॥ स्वभावभद्रः शत्रुघ्नः केशवः स्थाणुरीश्वरः ॥ भूतादिः शंभुरादित्यः स्थवि
ष्ठः शाश्वतो ध्रुवः ॥ २८ ॥ कवची कुंडली चक्री खड्गी भक्तजनप्रियः ॥ अमृत्युर्जन्म
रहितः सर्वजित्सर्वगोचरः ॥ २९ ॥ अनुत्तमो प्रमेयात्मा सर्वादिर्गुणसागरः ॥
समः समात्मा समगो जटामुकुटमंडितः ॥ ३० ॥ अजयसर्वभूतात्मा विष्वक्से
नो महातपाः ॥ लोकाध्यक्षो महाबाहुरमृतो वेदवित्तमः ॥ ३१ ॥ सहिष्णुः सद्गतिः
शास्ता विश्वयोनिर्महाद्युतिः ॥ अतींद्र ऊर्जितः प्रांशुरुपेंद्रो वामनो बलिः ॥ ३२ ॥
धनुर्वेदो विधाता च ब्रह्मा विष्णुश्च शंकरः ॥ हंसो मरीचिर्गोविंदो रत्नगर्भो महाद्यु
तिः ॥ ३३ ॥ व्यासो वाचस्पतिः सर्वदर्पकपिता सुरमर्दनः ॥ जानकीवल्लभः पूज्यः
प्रकटी प्रीतिवर्धनः ॥ ३४ ॥ संभवोतींद्रियो वेद्यो निर्देश्यो जांबवत्प्रभुः ॥ मदनो
मन्मथोऽव्यापि विश्वरूपो निरंजनः ॥ ३५ ॥ नारायणो घृणी साधुर्जटायुप्रीतिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम र्द्धनः ॥ नैकरूपो जगन्नाथो सुरकार्यहितः प्रभुः ॥३६॥ जितक्रोधो जितारातिः प्लव स॰ना॰
गाधिपराज्यदः ॥ मुकुंदः सुभुजो नैकमायो भव्यप्रमोदनः ॥३७॥ चंडांशुः सिद्धसं
३ कल्पः शरणागतवत्सलः ॥ अगदो रोगहर्त्ता च मंत्रविन्मंत्रपावनः ॥३८॥ सौमित्रिव
त्सलो धुर्यो व्यक्ताव्यक्तस्वरूपधृक् ॥ निस्पृहो ग्रामणीः श्रीमाननुकूलः प्रियंवदः
॥३९॥ अक्षयो सात्विको धीरो वीरासनविशारदः ॥ जष्टः सर्वगुणोपेतः शाक्ति
मांस्ताटकांतकः ॥४०॥ वैकुंठः प्राणिनां प्राणः कमठः कमलाधिपः ॥ गोवर्द्ध
नधरो मत्स्यरूपः कारुण्यसागरः ॥४१॥ कुंभकर्णप्रभेत्ता च गोपी गोपा
लसंवृतः ॥ मायावी व्यापनो व्यापी रैणुकेयबलापहः ॥४२॥ पिनाकमथनो ३
वंद्यः समर्थो गरुडध्वजः ॥ लोकत्रयाश्रयो लोकभरितो भरताग्रजः ॥४३॥
श्रीधरः सद्गतिर्लोकसाक्षी नारायणो विभुः ॥ मनोवेगी मनोरूपी पूर्णः पुरुषपुंगवः
॥४४॥ यदुश्रेष्ठो यदुपतिर्भूतावासः सुविक्रमः ॥ तेजोधरो धराधारश्चतुर्मूर्तिर्महानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिः ॥४५॥ चाणूरमर्दनो वंद्यः शांतो भरतवंदितः ॥ शब्दातिगो गभीरात्मा कोमलांगः प्रजा-
गरः ॥ ४६॥ लोकगर्भः शेषशायी क्षीराब्धिनिलयो ऽनिलः ॥ आत्मयोनिरदीनात्मा स-
हस्रार्चिः सहस्रपात् ॥४७॥ पर्जन्यः कुमुदो भूतावासः कमललोचनः ॥ श्रीवत्सवक्षाः
श्रीरामो वीरहा लक्ष्मणाग्रजः ॥४८॥ लोकाभिरामो लोकारिमर्दनः सेवकप्रियः ॥ सनात-
नतमो मेघश्यामलो राक्षसांतकः ॥४९॥ दिव्यायुधधरः श्रीमान प्रमेयो जितेंद्रियः ॥
भूदेववंद्यो जनकप्रियकृत्प्रपितामहः ॥ ५०॥ उत्तमः सात्विकः सत्यः सत्यसंधस्त्रि-
विक्रमः ॥ सुलभः सुव्रतः सूक्ष्मः सुघोषः सुखदः सुखी ॥५१॥ दामोदरोऽच्युतः र्ङ्गी वाम शा
नो मथुराधिपः ॥ देवकीनंदनः शौरिः शार्ङ्गी कैटभमर्दनः ॥५२॥ सप्ततालप्रभेत्ता च
मातृवंशप्रवर्धनः ॥ कालस्वरूपी कालात्मा कालः कल्याणदः प्रभुः ॥५३॥ संवत्सर ऋ-
तुः पक्षो हायनो दिवसो युगः ॥ भव्यो विविक्तो निर्लेपस्तपो व्यापी निराकुलः ॥ ५४॥
अनादिनिधनः सर्वलोकपूज्यो निरामयः ॥ हंसो रसज्ञः सारज्ञो लोकसारो रसात्मकः ॥५५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम सर्वदुःखातिगो विद्याराशिःपरमगोचरः शेषो विशेषोविगतकल्मषो रघुपुंगवः ॥ ५६॥ स॰ना॰
वर्णश्रेष्ठो वर्णभावो वर्णीविर्णगुणेश्वरः ॥ सर्वसाक्षी गुणश्रेष्ठो देवासुरवरप्रदः॥ ५७॥
४ देवाधिदेव देवर्षि दैवासुरनमस्कृतः ॥ सर्वदेवमयश्चश्री शार्ङ्गपाणिरनुत्तमः ॥ ५८॥ मनो
बुद्धिरहंकारः प्रकृतिपुरुषोव्ययः॥ न्यायोन्यायीनयीश्रीमान्नयोगधरो धृवः ॥ ५९॥ ल-
क्ष्मी विश्वंभरो भर्तादिवेशो वालिमर्द्दनः॥ बाणारिमर्द्दनोयज्वा उत्तमोमुनिसेवितः ॥६०॥
देवाग्रणीः शिवध्यानतत्परःपरमःपरः॥ सामगेयप्रियश्शूरः पुण्यकीर्तिःसुलोचनः
॥६१॥ पुण्यपुण्याधिकः पूर्वःपूर्णःपूरयितारविः॥ जटिलकल्मषध्वांतप्रभंजन
विभावसुः॥६२॥ अव्यक्तलक्षणो व्यक्तदशास्यद्विपकेसरी॥ कलानिधिः क ४
लारूपकमलानंदवर्धनः॥ ६३॥ जयोजतारिसंपूर्णो सुमनोभवभंजनः ॥
अलंकरिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः॥ ६४॥ आशुशब्दपतिःशब्दगोचरो
रंजनोलघुः॥ निश्शब्दःपुरुषो मायीस्थूलसूक्ष्मविलक्षणः ॥६५॥ आत्मयोनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रयो निश्च शतजिव्हः सहस्रपान्॥ अमृतांशुर्महा[illegible]गर्भो निवृत्त विषय स्पृहः॥ (गर्भो)
॥६६॥ त्रिकालज्ञो मुनिः साक्षी विहायसगतिः कृतिः॥ सनालनतमः स्रग्वी पेश
लोजो विनांवरः॥६७॥ शक्तिमान्शंखभृन्नाथो गदाधर रथांगभृत्॥ निरीहो
निर्विकल्पश्च॥ चिद्रूपो तीत साध्वसात्॥६८॥ सनातनः सहस्राक्षः शतमूर्ति
घनः प्रभः॥ हृत्पुंडरीकशयनः कठिनोद्रव एवच॥६९॥ सूर्यग्रिहपतिः श्रीमान
समर्थोनर्थनाशनः॥ अधर्मशत्रू रक्षोघ्नः पुरुहूतः पुरुष्टुतः॥७०॥ ब्रह्मगर्भो बृ
हद्गर्भो धर्मधेनुर्धनागमः॥॥ हिरण्यगर्भोज्योतिष्मान्सुलल्माटसुविक्रमः॥७१॥
शिवपुजारतः श्रीमान् भवानी प्रियकृद्वशी॥ नरोनारायणोरामः॥ कदर्पनील
र्गो हितः॥७२॥ रुद्रपशुपतिः स्थाणुर्विश्वामित्रो द्विजेश्वरः॥ मातामहो मात
रिश्वा विरंचो विष्टरश्रवाः॥७३॥ अक्षोभ्यः सर्वभूतानांचंडः सत्यः पराक्रमः
॥ वालखिल्यो महाकल्पः कल्पवृक्ष कलाधरः॥७४॥ निदाघस्तपनो मेघः शु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम र्कः परबलार्कहृत् ॥ कबंधमथनो दिव्यः कंबुग्रीवः शिवः प्रियः ॥७५॥ सुखानिलः स० ना०
५ सुनिष्पन्नः सुरभिः शिशिरात्मकः ॥ असंख्यश्चातिशद्रश्च प्रमाथी पापनाशकृत्
॥७६॥ वसुश्रुवाकव्यवाहः प्रतप्तो विश्वभोजनः ॥ रामो नीलोत्पलः श्यामो ज्ञान-
स्कंधो महाद्युतिः ॥७७॥ पवित्रपादः पापारिर्मणिपूरो नभोगतिः ॥ उत्तारणो
दुष्कृतिहा दुर्द्धर्षो दुःसहोऽभयः ॥७८॥ अमृतांशो मृतवपुर्धर्मी धर्मः कृपापरः
भर्गो विवस्वानाचार्यो योगाचार्यो दिवस्पतिः ॥७९॥ उद्भवः कीर्तिरुद्योगी वा
ङ्मयः सदसन्मयः ॥ नक्षत्रमाली राक्षसकेशः स्वाधिष्ठानः षडाश्रयः ॥८०॥
श्री चतुर्वर्गफलं वर्गी शक्तित्रयं फलं निधिः ॥ निदानगर्भो निर्व्याजो नरेशो वालि
५ मर्दनः ॥८१॥ श्रीवल्लभः शिवारंभः शांतभद्रः समंजसः ॥ भूशयो भूतिकृद्भूति ५
र्भूषणो भूतिवाहनः ॥८२॥ अकायो भक्तकाकुत्स्थः कालज्ञानी महापटुः ॥
परार्थवृत्त्यंतरलो विविक्तः श्रुतिसागरः ॥८३॥ स्वभावभद्रो मध्यस्थः सं-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारभयनाशनः ॥ वेद्यो बोध्यो वियद्व्योमा सत्तावर मुनीश्वरः ॥८४॥ सुरेंद्रः
कारणं कर्म करः कर्मी ह्यधोक्षजः ॥ धैर्योधुर्यो धराधीशः संकल्पः शर्वरीप-
तिः ॥८५॥ परमार्थगुरुर्वृद्धः शुचिराश्रितवत्सलः ॥ विष्णुर्जिष्णुर्विभुर्यज्ञो
यज्ञेशो यज्ञपालकः ॥८६॥ प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकभावनः ॥
केशिहा केशवः काव्यं कविः कारणकारणं ॥८७॥ काव्यकर्ता कलाशीषो वासु
देवः पुरुषस्तुतः ॥ आदिकर्ता वराहश्च वामनो मधुसूदनः ॥८८॥ नारायणो
नरो हंसो विष्वक्सेनो जनार्दनः ॥ विश्वकर्ता महायज्ञो ज्योतिष्मान् पुरुषोत्त
मः ॥८९॥ वैकुंठः पुंडरीकाक्षः कृष्णः सूर्यः सुरार्चितः ॥ नारसिंहो महाभीमो
वक्रदंष्ट्रो नखायुधः ॥९०॥ आदिदेवो जगत्कर्ता योगीशो गरुडध्वजः ॥ गोवि
दो गोपतिर्गोप्ता भूपतिर्भुवनेश्वरः ॥९१॥ पद्मनाभो हृषिकेशो धाता दामो
दरः प्रभुः ॥ त्रिविक्रमस्त्रिलोकेशो ब्रह्मेशः प्रीतिवर्द्धनः ॥९२॥ वामनो दुष्ट

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम [illegible]दमनो गोविंदो गोपवल्लभः ॥ भक्तप्रियोच्युतः सत्यः सत्यकीर्त्तिर्धृतिः स्मृ स॰ना॰
तिः ॥९३॥ प्रज्ञः कारुण्यकारुण्यो पापहा शांतिवर्द्धनः ॥ संन्यासी शास्त्र
६ तत्वज्ञो मंदराद्रिनिकेतनः ॥९४॥ बदरीनिलयः शांतस्तपस्वी विद्युतःप्रभः
॥ भूतावासो गुहावासः श्रीनिवासः श्रियःपतिः ॥९५॥ तपावासो मुद्रावासः
सत्यावासः सनातनः ॥ पुरुषः पुष्करः पुण्यः पुष्कराक्षो महेश्वरः ॥९६॥ पूर्ण
मूर्तिः पुराणज्ञः पुण्यदः पुण्यवर्द्धनः ॥ शंखी चक्री गदी शार्ङ्गी लांगली मुसली
हली ॥ ९७॥ किरीटी कुंडली हारी मेखली कवची ध्वजी ॥ योध्दा जेता महावी
र्यः शत्रुघ्नः शत्रुतापनः ॥९८॥ शास्ता शास्त्रकरः शास्त्रं संतनः शंकरस्तुतः ॥
सारथिः सात्विकः स्वामी सामवेदः प्रियः समः ॥९९॥ सबलः साहसः ६
शक्रः संपूर्णांगः समृद्धिमान् ॥ स्वर्गदः कामदः श्रीदः कीर्तिदः कीर्तिनाय
कः ॥१००॥ मोक्षदः पुंडरीकाक्षः क्षीराब्धिकृतकेतनः ॥ सर्वात्मा सर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लोकेशः प्रेरकः पापनाशनः ॥ १ ॥ वैकुंठः पुंडरीकाक्षः सर्वदेवनमस्कृतः ॥ स-
र्वव्यापी जगन्नाथः सर्वलोकमहेश्वरः ॥ २ ॥ सर्गस्थित्यंतकृद्देवः सर्वलोकसुखा
वहः ॥ अक्षयः शाश्वतोनंतः क्षयवृद्धिविवर्जितः ॥ ३ ॥ निर्लेपो निर्गुणः सूक्ष्मो
निर्विकारो निरंजनः ॥ अचलो निर्मलो व्यापी नित्यतृप्तो निराश्रयः ॥ ४ ॥ अवि-
कारी विभुर्नित्यः परमात्मा सनातनः ॥ सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थि
तः ॥ ५ ॥ श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषितः ॥ आजानुबाहुः सुमुखः
सिंहस्कंधो महाभुजः ॥ ६ ॥ सत्ववान् गुणसंपन्नो दीप्यमानस्वतेजसा ॥ का
लात्मा भगवान् कालः कालचक्रप्रवर्तकः ॥ ७ ॥ नारायणपरंज्योतिः परमात्मा
सनातनः ॥ विश्वसृग्विश्वगोप्ता च विश्वभोक्ता च शाश्वतः ॥ ८ ॥ विश्वेश्वरो विश्व
मूर्तिर्विश्वात्मा विश्वभावनः ॥ सर्वभूतसुहृच्छांतः सर्वभूतानुकंपनः ॥ ९ ॥
सर्वेश्वरेश्वरः सर्वः सर्वस्वाश्रितवत्सलः ॥ सर्वगः सर्वभूतेशः सर्वभूताशय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम यस्थितः ॥१०॥अभ्यंतरस्यनभसोद्रष्टानारायणःपरः॥अनादिनिधनःस्र स०ना०
ष्टा प्रजापतिर्हरिस्स्वयं ॥११॥नारसिंहोहृषिकेशः सर्वात्मा सर्वदृग्वशी॥जग
७ तस्तस्थुषश्चैव प्रभुर्नेतासनातनः॥१२॥कर्ताधाताविधाताचसर्वेषांपति
रीश्वरः॥सहस्रमूर्तिर्विश्वात्मा विष्णुर्विश्वदृगव्ययः॥१३॥पुराणपुरुषःस्र
ष्टा सहस्राक्षसहस्रपात्॥तत्वंनारायणो विष्णुर्वासुदेवस्सनातनः॥ १४॥पर
मात्मापरब्रह्मपरंजोतिःपरात्परः॥अच्युतःपुरुषःकृष्णःशाश्वतःशिवईश्वरः
॥१५॥ नित्यसर्वगितःस्थाणुरुग्रःसाक्षीप्रजापतिः॥हिरण्यगर्भःसवितालो
ककृल्लोकभुग्विभुः॥१६॥अकारवाच्यभगवान्श्रीभूलीलापतिः प्रभुः॥ ७
सर्वलोकेश्वरश्रीमान्सर्वज्ञःसर्वतोमुखः॥१७॥स्वामीसुशीलस्सुल
भः सर्वज्ञःसर्वशक्तिमान्॥नित्यसंपूर्णकामश्च नैसर्गिकसुहृत्सुखी॥१८॥
पी कृपापीयूषजलधिः शरण्यं सर्वदेहिनां॥श्रीमान्नारायणःस्वामीजगतांप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुरीश्वरः॥१९॥ श्रीशः शरण्योभूतात्मानां संश्रिताभिष्टदायकः॥ अनंत
श्रीपतिरामो गुणभृन्निर्गुणो महान्॥२०॥ ॐ नमोनमः॥ रामायरामभद्रा
यरामचंद्रायवेधसे॥ रघुनाथायनाथायसीतायाः पतयनमः॥२१॥ रामा
यपद्मनेत्राय कौसुभोद्भासितायच॥ शामायपीतवस्त्राय रमायाःपतयेन
मः॥२२॥ एवमादीनिनामानि ह्यसंख्यान्यपराणिच॥ उक्तानि तवपुत्रेणवि
घ्न~~कास्य~~राजेनधीमता॥२३॥ सनत्कुमारेणपुरा तान्युक्तानिमयानघ॥
एकैकं नामरामस्य सर्वपापप्रणाशनं॥२४॥ सहस्रनामफलदं सर्वैश्वर्य
प्रदायकं॥ सर्वसंपत्प्रदंनृणां भुक्तिमुक्तिफलप्रदं॥२५॥ मंत्रात्मकमिदं
सर्वमाख्यातं सर्वमंगलं॥ यःपठेच्छृणुयाद्वापि सतुब्रह्मपदंलभेत्॥२६॥
तावदेवमदस्तेषां महापातकदंतिनां॥ यावन्नश्रूयते रामनामपंचानन
ध्वनिः॥२७॥ ब्रह्मघ्नश्चसुरापश्च स्तेयीचगुरुतल्पगः॥ शरणागत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम

८ घातीच मित्रविश्वासघातकः ॥२८। मातृहा पितृहा चैव भ्रूणहा वीरहा तथा स०ना
कोटिकोटिसहस्राणि ह्यतिपापानि यान्यपि॥ २९॥ संवत्सरं कृते जाप्यं प्रत्य
हं रामसन्निधौ॥ ।निःकलंक सुखं भुक्त्वा ततो मोक्षमवाप्नुयात्॥१३०॥
इति श्री शिवपुराणे उमामहेश्वरसंवादे श्रीरामसहस्रनाम संपूर्णम्॥ ८
॥श्रीराम परब्रह्मणे नमः॥ श्रीकृष्णार्पणमस्तु॥ इतिश्री॥ श्रीरामचंद्रार्पणमस्तु॥ श्रीगुरुसमर्थ॥

॥ श्रीगणेशायनमः ॥ श्रीरामकुलेष्टदेवताभ्यानमः ॥ कैलासशिखरेरम्ये नानावृक्ष समन्विते ॥ लतापुष्पसमाकीर्णे सिद्धगंधर्वसेविते ॥ तं स्वोपरि समासीनं शंकरंलोकशंकरं ॥ पप्रच्छ गिरिजाकांतं प्रणिपातपुरस्सरं ॥ २॥ श्रीदेविउवाच ॥ स्वामिन् कथयदेवेशसंशयोस्तिमहान्मम ॥ कस्य स्तोत्रस्य पाठेण रामचंद्र प्रसीदति ॥ ३॥ श्रीमहादेवउवाच ॥ शृणु देवि प्रवक्ष्यामि सावधानेन श्रूयतां ॥ कथितं रामसाहस्रं मकारादि मनोहरं ॥ ४॥ पुराद्धर्वयुगे धाता नारदाय ददौ पुनः ॥ नारदोक्तभक्तिभावेन धारयित्वामहेश्वरि ॥ ५॥ भक्तेभवश्च लोकेस्मिन् रामचंद्रदयानिधेः ॥ (मंत्राणं) मंत्रबिजानां मंत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामसहस्रकं ॥६॥ वेदानां प्रणवो बीजं देवानां सिद्धिदायकं ॥ मंत्राणां तारको मंत्रः साक्षा
१ त्ब्रह्मस्वरूपकः ॥७॥ नदेयं कस्य देवेशि दिव्यनामसहस्रकं ॥ गोपनीयं प्रयत्नेन नप्र
काशं कदाचन ॥८॥ शठाय पापिने शिष्याय लंपटाय विशेषतः ॥ नदातव्यं नदातव्यं नदातव्यं
महेश्वरी ॥९॥ आत्मतत्वं शृणु प्रिये योगानां सारमुत्तमं ॥ यत्प्रभावेन देवेशि नरो मुक्तिम
वाप्नुयात् ॥१०॥ यत्प्रभावेन हर्ताहं त्राता विष्णुरमापतिः ॥ यत्प्रभावेन कर्ता भूद्देवो ब्रह्म १
प्रजापतिः ॥११॥ मकारादि प्रियं प्रोक्तं देवानामपि दुर्लभं ॥ अभक्ताय न दातव्यं यदि ब्रह्म
समो नरः ॥१२॥ ब्राह्मणानां क्षत्रियाणां वैश्यानामपि पार्वती ॥ दीयतां वैष्णवायेति रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनामसहस्रकं ॥१३॥ गोजायरामभक्ताय गुरुभक्तिपरायच ॥अभक्तायनदातव्यं

दातव्यं गुरुहाभवेत् ॥१४॥ ॐ अस्य श्री मकारादि श्री राम सहस्रनाम स्तोत्र मंत्रस्य

अगस्त्य ऋषिः अनुष्टुप्छंदः श्रीरामः परमात्मा देवता मं बीजं मीं किलकं मुंशक्तिः म

मसकल कामनासिध्यर्थे जपे विनियोगः ॥ अथन्यासः ॥ ॐ मं अंगुष्ठाभ्यांनमः

ॐ मीं तर्जन्याभ्यां॰ ॐ मुं मध्यमाभ्यां॰ ॐ मैं अनामिकाभ्यां॰ ॐ मौं कनि॰

भ्यां॰ ॥ ॐ मः करतलकरपृष्ठाभ्यां॰ ॥ एवं हृदयादिन्यासः ॥ ॐ भूर्भुवःस्वरों दिग्बं

धः ॥ अथध्यानं ॥ रामं कालस्वरूपं रघुकुलमनिशं शामलं कोमलांगं पाणौ नाराच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चापं पुरस्सिधृतवंतं दिव्यरत्नौघमाल्यं ॥ वामांके भाति सीतां स्मितमधुरमुखां भोजनेत्रं —
२ विशालं ध्यायेतं रामचंद्र दशरथतनयं देहिमे भुक्ति मुक्तिं ॥१॥ ॥ इत्यादि पंचोपचारैः पू०
ॐ महारामो महाराजो महांतो मनुजो मुनिः ॥ मनोमन हरो [redacted] मारो मधुरो पुरमर्दनः १
मदनो मधुरानाथो महानादो महायुधः ॥ मन्मथारि र्महामारी महामारी विनाशनः ॥२॥ ध:
मधुरो मधुराकारो मधुरालयवासकृत् ॥ मधुसूदन मनामच्चे मनीषी मनुरीश्वरः ३॥ २
मधुप्रियो मधुरत्नो माध्वीको मधुरो मधुः ॥ मधुवातो मधुऋतुर्मद घूर्णितलोचनः ॥४॥
मधुरेको मधुरिपुर्मधुदैत्यविनाशनः ॥ मुरारिर्मुरकी माई माणिकौस्तुभधारकः ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंदस्मित्त मंदगतिर्मुकुंदोमदनेश्वरः ॥ मुरलीनादसंप्रीतो मुरलीनादल्हादितः ॥६॥
मुरलीनादकुशलो मुरलीनादविशारदः ॥ मुरलीवादनरतो मुरलीध्वनिमोहितः ॥७॥
मालतीपुष्पसंप्रीतो मालतीमाल्ययावृतः ॥ मालतीचसूगंधाढ्यो मालाकारो महद्युतिः ॥८॥
मालतीवनसंप्रीतो मालतीवनपालकः ॥ मुक्तकेशोमहाशांतो महादांतो महोदरः ॥९॥
मोक्षरूपो महोक्षश्च मोक्षैकफलसाधनः ॥ मत्सरोमानमथनो मानमत्सरहारकः ॥१०॥
महानुभावोमनितो मायत्तिर्मधुरैर्वृतः ॥ मधुवाली महीत्राता महीभारनिरवारणः ॥११॥
महातत्व माहांबोधिर्महातत्व परिग्रहः ॥ महातत्वमयी मूर्त्तिर्महातत्व परोमतिः ॥ १२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महातत्वालय मनोमनःसंकल्पवर्जितिः॥ मनस्सारोधनपरोमनसाँधाःन रुचिः॥१३

२ मदनारि र्मनोहारी मदनो मदनांतकः॥ मनोजो मोहनोमोहो महामल्लौघतारकः॥१४॥

मोहनो मुरलीधारी र्मुकुटांगदमंडितः॥ मयूरध्वनिप्रल्हादो मयूरध्वनिमोहितः॥१५॥

मयूरपक्षरश्चैवमयूरपक्षकांतिधृक्॥ मयूरपक्षवपुषर्मयूरस्वमोहितः॥१६॥मरीचि दि

र्दमनो मुख्यौ मरीचिर्दमनोरुचिः॥ मरीचिस्थो मरीचिरथो मरीचिस्थानवर्चसः १७ ३

मुरारिर्माधवोमल्लोमधुसुदनमंदरः॥ मनोहरो महांभोधि र्माहंमोदो माहावरः॥१८॥

मोदरूपो महानंदो महामधुर्महीधरः॥ मुक्तिरूपो मुक्तिदेयो मुक्तेशो मुक्तिनायकः १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुक्तिप्रियो मुक्तिराजो मुक्तिदायकमानवः॥ मंगलायतनो देवो मानंदकरसुंदरः॥ २०॥

मुक्तिकाभरणोपेतो मुद्रिकाभिरलंकृतः॥ महाभाग्यप्रदोमंदो मंदस्मितमहोरगः॥२१॥

मत्स्यरूपधरो मौली मौंजी कटिविराजितः॥ मानंदर्भ हरो मानो माधवो मकरध्वजः॥२२॥

मायामयनिरस्तायी मायामयमलापहा॥ मर्च्येमिंगलदाताच महांतो महमूर्तिमान॥२३॥

मालाकरो महेशानो महेशो माहिषोमधुः॥ मुरारिर्मानदो मानो महीशो मानखंडनः॥२४॥

मानदाता मानत्राता माननापमहापरः॥ मानभोनी मानदक्षो माननीच विरोस्थितः॥२५

माननीमानसंप्रीतो माननीमोहिनीरतः॥ मनोहरो मानदंडो मुनिसाधनतत्परः॥ २६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुचकुंद्रो महामोहि माहासुर महोत्कट ः॥ महोत्साहो महोत्पातो मारीचक्षोभ कारकः ॥ २७ ॥
महाक्षोभ महाऋक्षो महर्शीक्षो महामखी ।। मुद्रा मयो मंत्रमयो मंत्र ऋक्षो महाफलः ॥ २८ ॥
महाधनो महादीनो मधुरा वल्लभो महि ।। महानाथो म्लेंछ हा च मलहर्ता महायशः ॥ २९ ॥
महाबोधो महानीशो मायामय मयोमयः ।। मुनिपुष्पो मुनीश्वरस्थो मुनिपुष्पोपशोभितः ३०
मुनिपुष्प प्रियो मित्रो मुनिपुष्प महाऋचिः ॥ मुनिपुष्पे समुद्भूतो मुनिपुष्पे समुत्सुखः ३१ ॥
मुशली मुशलाधारी मृत्युंजय महाऋतुः ॥ मखवादी मदोद्धारी मदकामी नकेतनः ॥ ३२ ४
मरुत्वान्मधवो माधो मघानक्षत्र मारुतः ॥ मेनका मंजुघोषाप्तो मेरुमलयवासकृत ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेनकारूपसंतुष्टो मेनकालिंगनेप्रः ॥ मैनकादानसंतुष्टो मेनकादानतत्परः ॥ ३४ ॥ —
मकारणामह्लादो मेनेकाचुंबने रुचिः ॥ मरुतो मारुतो मारो मनीषि मानुषी मणिः ॥ ३५
माधवो मधुराकांतो महायज्ञो महीसुतः ॥ महाश्रमो महासाधो महागर्वो महाकरः ॥ ३६ ॥
महाशक्तो महादांतो महाकांतो महामतिः ॥ महाकामो महायोगी महातेजो महेश्वरः ॥ ३७
मेघनांदो मेघरूपो मेघवृष्टिनिवारकः ॥ मेघजीवनहेतुश्च मेघतुल्यो मनोरथः ॥ ३८ ॥
मेघश्यामो मेघवासो मेघतुल्यो महासुखः ॥ महाबलो महोल्हासो महाबलपराक्रमः ३९
महाचंद्रो महारुद्रो महाब्रह्म प्रजापतिः ॥ मणितुल्यो मणिग्रीवो मणिमालाविभूषितः ॥ ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मणिकांतिधृतोमत्तोमणिराजोमणिप्रियः॥महानीकोमहाजीवोमरमानविवर्जितः॥४१॥

मंजरीरञ्जितपदोमंजरीपुष्परंजकः॥मेघरूपधरोमेघोमेघनायकमायिकः॥४२॥

५ मायापरोमहानीशोमायापतीमखसखः॥मनोरथविलाशीचमनोरथविलासकृत॥४३॥

मनोरथप्रदाताचमनोरथमहारथी॥मखरूपोमखमुख्योमखरज्ञानतत्परः॥४४॥

मखराजोमखाधीशोमखेशोमखनायकः॥मखपूर्णोमहापूर्णोमखवासीमखेश्वरः॥४५ ५

मखधूमेविलासीचमखधूमोमहोतकः॥महाविराडमहिषामहिपालनतत्परः॥४६॥

महीमंगलकर्ताचमहीमंगलमंगलः॥महीमंगलदाताचमहीमंगलदायकः॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महामंगलकारी च महामंगलपालकः ॥ माङ्गल्यशीलो श्च मङ्गल्यं मङ्गल्यश्च मनोधिकः ॥४८

मङ्गल्यकरमाचारी मृगमाङ्गल्यकारकः ॥ मातङ्गो मत्रमातङ्गो मातङ्गी मातरंज्यकः ॥४९॥

मातङ्गरूढो मधुरो मतमातंगमर्दनः ॥ मधुराधो मधुरेषु मधुराधरचुंबनः ॥५०॥ —

मधुवादो मधुरतो मधुरो मधुराकृतिः ॥ मधुरव्रतधारी च मधुवृत्तिपरायणः ॥५१॥

मधुस्वादो मनोल्हादो मधुनेत्रो मधुप्रियः ॥ मधुदैत्यविनाशी च मधुदैत्यविमर्दनः ॥५२॥

मधुवाद्यो मधुनादो मधुरेषो मधुप्रियः ॥ मानिनीमानसंतुष्टो मानिनीनाच मोददः ॥५३॥

मानिनीनां विलासी च मानिनी ~~मानमोचक~~ः मानिनीनां विलासी च मानिनीमानमोचकः ॥५४॥
वृतमोष्टकः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मानिनीरासनिरतो मानिनीमानतत्परः ॥ मकरंदप्रियो मित्र मकरंदनिवासकः ॥५५॥
६ मकरंदविहारीच मकरंदो महारविः ॥ मधुपो मकरंदश्च मल्लिकापुष्पराजितः ॥५६॥
मल्लिकावनसंचारी मल्लिकावनस्थापकः ॥ मल्लिकाभिरतो मल्ली मल्लिकाभूषणे रुचिः ॥५७॥
मिमांसा मत्स सत्त्वाच मत्सरो मत्स्याकृतिः ॥ मुखरो मुखराधीशो मुखेशो मुख्यनायकः ॥
मुख्यदानरतो माख्यो मधुकैटभनाशनः ॥ मधुकैगो महीपुत्रो महीशेग महीधारकः ॥५९ ६
महीपालो महाकाली महावृत्त प्राणनायकः ॥ मनसाराधनपरो मनसासाधनेरतिः ॥६०॥
मनी पो मंत्रचारीच मनसापालने प्रसः। मोरध्वजो मोरपालो मोरध्वजो महाहनुः ॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हर्षो धर्मपूरकः ॥

महाद्भुतो महातेजो महाहर्षो महातपः ॥ महाचक्री महाबोधो महाकौतो महातपः ॥६२

महालोकगतो दृष्टो महर्लोकफलप्रदः ॥ महर्लोकनिवासी च महर्लोकविहारकः ॥६३ क

महारथो महानुष्यो महातत्व महाशनः ॥ मेधाचार्यो महाचार्यो भुजंगो महदाचलः ॥६४

मनोवेगो मृगाधीशो मृगचर्मधरो वरः ॥ मृगमांसरतो मृग्यो मृगमालानिषूदनः ॥६५

मृग मारीचदमनो मृगमारीचमुक्तिदः ॥ मृगमार्गगतो मंदो मंदगामी मतां वरः ॥६६॥

मृगांगो मृगमापन्नो मृगनेत्र मृगेश्वरः ॥ मृगांगलोप संतुष्टो मृगांगालेपनेरतः ॥६७॥

मृगांगा भालको मृग्यो मृगांगमलया मदः ॥ मायानिर्जित मायीशो मायानिर्मितविग्रहः ॥६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मायापरो महामायो महामायापहारकः ॥ मायाधारी मार्गशीर्षो मघवा माघमासकः ॥६९॥

७ मघवा मानमंथनो महानीशो महामखः ॥ मरुत्वाम हिप्रियो बंधुर्मघानेत्र मापतिः ॥७०॥ श्र

मघवात्रासहारी च मघवारिपुनाशनः ॥ मेखली मेखलीमेषी मेषमीनादिराशय ॥७१॥

मेघश्चापश मेघमाला मेघमालानिवारकः ॥ मेघस्वनो मेघराजो मेघकांतिधरो मल ॥७२॥

मेघवर्षो मेघकरो मेघावली निवारकः ॥ मणिभद्रो मनुष्येशो मानुषो मनुजाकृतिः ॥७३॥ ७

महावराहो मांतस्थो मनःसंतोषकारकः ॥ मनोरंभो मानदंभो मोदमोदरतो मुदः ॥७४॥

मोदकृन्मोदभोक्ता च मोदविद्याविशारदः ॥ मोदकारी मोदधारी मुदितो मुदितापनः ॥७५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोदकांतरुचिर्मुग्धो मुग्धरो मुखिकावृतः ॥ महल्लोकाचलमलो मल्लविद्याविशारदः ॥७६॥
महामल्लो महाकल्पो महानल्पो महानलः ॥ मलयाचलसंभूतो मलयाचलवासकृत ॥७७॥
मलयाचलवृक्षस्थो मलयाचलसेवितः ॥ मलयाचलसंतुष्टो मलयाचलवंदितः ॥७८॥
मलयाचलमुत्पातो माहाधुत्पातनाशनः ॥ महाधुत्पातकारी च महाधुत्पातभक्षकः ॥७९॥
माहाचार्यो माहाकार्यो मुनीनां मोक्षदायकः ॥ मुनिप्रियो मुनिरतो मुनिशो मुनिपालकः ॥८०॥
मुनिराजप्रियो मोहो मेधो मेधादयापरः ॥ मेधाकरो महाबुद्धिर्मेधान्यायी महानघः ॥८१॥
मेधावीमीनमथनो मेधावीमां महद्धराः ॥ मेधावी दानसंतुष्टो मेधादानपरायणः ॥८२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेधामदो महोत्साहो मेधाराधनतत्पर: ॥ मोक्षमार्गो मोक्षपरो मोक्षमार्गप्रकाशक: ॥ ८३॥

८ मोक्षमार्गरतो मोक्ष मुमुक्षो मोक्षदायक: ॥ मोक्षचपरो मोक्षकरो मुमुक्षुर्मोक्षमापति: ॥ ८४

मुक्ताहारधरो मुक्तो मुक्तेशो मुक्तिनायक: ॥ मुक्तराजो मुक्तपालो मुक्तमार्गविचक्षण: ॥ ८५॥

परो मुक्ताचारो मुक्तमुक्तो मुक्तानां मुक्तिदायक: ॥ मनोवेगो मनोरूपो मनून्वंतर सुमंदित: ॥ ८६॥

मन्वंतरकुले जातो मनोगतिविखंडन: ॥ मनसाप्रेरको मायो मायाचारव्यतिक्रम: ॥ ८७॥ ८

मनोहरो मनोनज्ञो मनोवृत्तिप्रकाशक: ॥ मनोवृत्तिभूमिकरो मनोवृत्तिनिवारक: ॥ ८८॥

मनोवृत्तिधरो मूल्यो मकरध्वजमाधवज: ॥ महाध्वरो महादेवो माहाक्षांतो मनोत्तम: ॥ ८९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मा

मार्गचार रतो मार्गे मार्गगामी महत्सुखः ॥ मार्गगामी सुखप्रदो मार्गिणां भयभंजनः ॥ ९०

मंत्रविद्या प्रेमंत्रो मंत्रचारो महामतिः ॥ मंत्रराजो मंत्रनंदो मंत्र मंत्रात्मको मतः ॥ ९१

मंत्रशास्त्र प्रदो मंत्री मंत्रीणां मंत्रदायकः ॥ मंत्र जाप्य विवासीच मंत्र जाप्यो महाप्रियः ॥ ९२

मंत्रबीजो मंत्रपरो मंत्र वश्यो मकल्मषः ॥ मंत्राराधनसंतुष्टो मंत्र पूजनतत्परः ॥ ९३ ॥

कारी महातपः ॥

मंत्रेष्टी मंत्रवादी च मंत्र ~~पूरमतत्पर~~ः ॥ महापक्षो महादक्षो महाचिंतामणिप्रभः ॥ ९४ ॥

महापुराणपुरुषो महाविश्वंभरो मतः ॥ महाविरा रमादित्यो महासिंहो महत्करः ॥ ९५ ॥

महाकपिंद्रो मकरो महाकालो महाबली ॥ मणुयो मणराकारो मणलीका महर्हरः ॥ ९६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महारण्य मध्यस्थो महामणु एकारकः॥ मुक्तिकैवल्यदाताच मुक्तिसायुज्यदायकः॥९७

१ मुक्तिसालोक्यदायीच मुक्तिसारूप्यरूढधीः॥ मुक्तिसामिप्यो माकांतो महासंतोषाचलोपमः॥

मुक्तानां मुक्तिदाताच मुमुक्षुणां मुपासितः॥ मुक्तेश्वरो मंदधनो मुग्धगोपांगनावृतः॥ ९९॥

मुग्धप्यो मुग्धरतो मुग्धगोपसमावृतः॥ मुग्धगोपविहारीच मुग्धगोपालपालकः॥ १००॥

महासिंहो महाहंतो महाचर्णोमहाबलः॥ महाद्वारो मतानास्थो भक्तानां मुदरवाहनः॥ १०१॥ १

मदमत्तो मदरतो मदमारविनाशनः॥ मानापमानयोर्मानी मुनिशापविखंडनः॥ २॥

वर्यो मुनिवर्यो मुनिपरो मुनित्रातामुनिप्रियः॥ मुनेरानंददाताच मुनिसंतोषकारकः॥ ३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यज्ञ

मुनियज्ञनिवासी च मुनिसुरक्षितः ॥ मुनिप्रियो मुनितपो मुनिप्राणो मुनेनृपः ॥४॥

मुनिपूजनसंतुष्टो मुनिपुज्यमुनेश्वरः ॥ मुग्धकांताप्रियो मित्रो मुग्धनायकनायकः ॥५॥

मुग्धाचारपरो मार्गो महामार्गो महाफलः ॥ महायोगो महाशयो महाभद्रो महाशिवः ॥६॥

मोहदाता मोदतीर्थो मातृणां मोददायकः । मोदमातंगदाता च मोदमार्गप्रवर्तकः ॥७॥

मोदमार्गप्रदाता च मोदमार्गप्रवर्तकः ॥ मनुष्यो मनुजाकारो मानलीलाविहारकृत् ॥८॥

मणुमालाधरो मृणो मुष्णुचःणुविस्वानुनः ॥ मधुवातो मधुरतो माधवो मधुराधरः ॥९॥

मेघरावापरो माघो मघवाभयनाशनः ॥ मनीषो मनईषश्च मनईषा मनीषिका ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुद्वेगी मरुद्गामी मरुतोजा महास्वरः ॥ महापाल्यो मरुत्पुत्रो महात्सक्तो महीधरः ॥११॥
महाकृष्णो महारुद्रो महद्विष्णुर्महिर्निशः ॥ महद्बीजं महदंडं महत्पक्षं खं महद्धनुं ॥ १२ ॥
महत्पत्रं महच्छत्रं महाबाणविनाशनं ॥ महागोलोकवासीच महावैकुंठनायकः ॥ १३ ॥
महाकालो महीपालो महाबुद्धिर्महाव्ययः ॥ महाचिंत्यो महाव्यक्तो महारामो महासुरः ॥
मत्स्यरूपधरो मत्स्यो मीन कर्म मैथुनप्रियः ॥ महाविराटो मोंकारो महस्सरशुधारकः ॥ १५ ॥
महापरशुधारीच महाधक्ति निवारकः ॥ मंमंमं बीजमतुलो मांमांमां मुनिबोधकः ॥ १६ ॥
मकारस्सर्वसाध्यानां मकार भरतात्मजः ॥ मकारः सर्वदेवानां मकारस्सर्वसिद्धिदः ॥ १७ ॥

१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मकारः सर्वजीवानां मकारः सर्वपालकः ॥ मकारः सर्वसिध्दानां मकारः सर्वकारणं ॥ १९

मकारो लोकलोकानां मकारः सर्वव्यापकः ॥ मकारः सर्वशास्त्राणां मकारः सर्वमायिकः ॥

मतिमानो मानमत्तो मत्तदैत्यविनाशकः ॥ मतिमान प्रियो मर्को मुनिधर्मपरायणः ॥ २० ॥

मतिवाद्मतांनाथो मनू मानुष महाधरः ॥ मायातीतो महानघो महाबलपराक्रमः ॥ २१ ॥

महावस्तु प्रदाताच महाक्षोमनुजेश्वरः ॥ मतिमान्मानघोमायी माधवोमिथुनेमिथः ॥ २२ ॥

मितवादी मत्तकेशो महाभूभारहारकः ॥ महादैत्यविनाशीच महादैत्यविनाशनः ॥ २३ ॥

महायोध्यापतिश्चैव महादशरथात्मजः ॥ महामुनिनिवासीच महामुनिसुखप्रदः ॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुनिशापधरो मर्को मंदरो मंदबांधवः ॥ मंदारवनसंचारी मंदारवनलापकः ॥ २६ ॥
११ मयूरनिःस्वनो मर्को मयूराकृतिकुंडलः ॥ मुक्तकुंपोथ मुक्ताध्येो मुक्तेमोहांध भंजकः ॥
मृत्युंजयो महामृत्युर्महाभवविखादनः ॥ मोंमोंमों मनुजरूपः श्रीं श्रीं श्रीं मृगमर्दनः ॥ २७ ॥
मुखांभोजवरो मध्यो मधुराम्नामरुरुस्फुरवः ॥ महाशुक्रो महाचित्रो महाचित्रारथोरूपः ॥ २८ मो० ला०
महाबंधो महासिंधुर्महात्सीक्षो महोत्सगः ॥ माहागरुडभासीनो महागोविंदमापरः ॥ २९ ॥ ११
महावृंदावनरतो महागोकुलनायकः ॥ माहारासरतो मंमंमं दगायनगायकः ॥ ३० ॥
महागोवर्धनधरो माहागोलोकदायकः ॥ माहाभ्दीतनयाप्रा णो माहाभ्दीतनयोप्रियः ॥ ३१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माहाक्षीसेतुकुशलो माहाशेल प्रपालकः॥ महाक्षीवंदनपरो महाक्षीमंथने स्तः॥ ३२

महापालक हारीच महापातकनाशनः॥ महाकोदंड धारीच महाकोदंडभंजनः॥ ३३।४

श्रीं क्लीं ग्लीं म्रीं माहाबीजो माहाबीज महोमखः॥ महाबालीप्रमथनो महाकंसनिकृंतकः॥३४॥

महायज्ञो महानज्ञो महादितो महाभयः॥ मृगचर्मंबिरधरो मृगचर्मंबिराधकः॥३५

मुंमुंमु चत्रिभिर्बिजो महाकृचेमिहढलः॥ मैंमैंमैं मोहप्रदाताच मापाबीजजपोजपः॥३६

महास्वाहास्वधा मंमंमं मांमां चामहीरुहाः॥ महाविशिष्यो महेंद्रो मुनिनाथो मुनिप्रियः ३७

मुनीनां मानसोवृंदो मुनीनां भयभंजनः॥ महावैभवहारीच महावैभव वै ~~भव~~ कारकः॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महादेवे भववासीच महादेवे भववैभवः ॥ मकाराक्षरधारी च मकारो मीनकेतनः ॥ १३९ ॥
१२ महा मय मयींयीं यीं श्रीं क्लीं क्लीं मयकङ्कणः । महारथो महारामो महाभक्तस्य बांधवः ॥ १४० ॥
इतिदं रामसाहस्रं श्रीरामस्य दयानिधेः ॥ पठनात्सापराधीनां खंडनं भयभंजनं ॥ १४१ ॥
यनराधमल्लोके राम भक्ति पराङ्मुखाः ॥ जपस्तापो दयाशौचं शास्त्राणां मूत्रगाहना ॥ १४२ ॥
सर्वं वृथा विनायेन शृणु त्वं पार्वति प्रिये । महानिशायां सततं मेकाकी मानसं कुरु ॥ १४३ ॥ १२
यः पठेत् नामसहस्रं जीवन्मुक्तो न संशयः ॥ वृंदावने वटतटे केतकी मालतीवने ॥ १४४ ॥
चतुःष्पथे मध्ये देशे गृहेणच शिवालये ॥ यो नरः पठते भक्त्या समुक्तो भुविभारते ॥ १४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कदलीवने चूतवने तग्रके सरितांतटे ॥ त्रातावर्तं पठे देवीमकारादी सहस्रकं ॥ ४६॥

श्रीराममचलाभक्तिर्भवेज्जन्मनिजन्मनी ॥ राजानोराजपुत्राश्च राजकीयाश्चमंत्रिणः

त्रिकालपठनाधस्यादृश्यंते चात्रिपक्षकः ॥ अश्वत्थमूले पठतोनास्तिवै रिकृतंभयं ॥ ४८॥

त्रिकालपठनाधस्यात्सिद्धिस्यात्करसंस्थिता ॥ ब्राह्मे मुहूर्ते चोत्थाय स्नानं कृत्वा रघुत्तमे ॥

नित्यं पठतिदेवेशी दिव्यनामसहस्रकं ॥ श्रीरामभक्तिमान्योति नृणांसुखमवाप्नुयात् ॥ ५०

यत्पूर्वंच कृतं पापं यत्पापं मानसं भवं ॥ तत्सर्वंश्रृणुतोभक्त्या नस्यंतेत्वमहद्भयां ॥ ५१॥

एकाग्रमानसो भूत्वा ध्यानंकृत्वा रघुवरा ॥ रामपार्श्वे गतां सीतां देवीं कांचनसंनिभां ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वराभयांगवरदां रत्नसिंहासनेस्थितं ॥ पृष्टे सौमित्रिव धूनां छत्रचामरशोभितं ॥ ५३॥

१३ अग्रे हनुमतं वीरं विनितज्ज कृतांजलिं॥ एवं ध्यात्वा पठेदेवी दिव्यनामसहश्रकं ॥ ५४॥

अहं ब्रंह्मत्वमाप्नोति योगिंद्राणां सुदुर्लभं ॥ धनार्थी धनमाप्नोति विद्यार्थी विद्ययावरः॥

पुत्रार्थी पुत्रमाप्नोति चिरकालं स जीवति ॥ रामनामपरो मंत्र तारको मूलकारकः॥ १५६

लक्षद्वयं जपेद्देवं पश्चाद्दशम सहस्त्रकं ॥ सहस्त्र राम पाठेन मकारादि मनोहरं॥ १५७॥ १३

गृहे तस्य स्थिरा लक्ष्मी स्थिरा भूत्वा सुनिश्चला॥ रकारादि न सिध्येत मकारादि विनाशिवे॥

मकारादि न सिध्येत रकारादि विनाप्रिये॥ चित्रकुटे रामवने एप ठंति च साधवः॥ १५९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम किंकरो भूत्वा वैष्णवा हठमानरासः ॥ गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥१६०॥
स्तोत्र राजस्य पाठेन नरोनारायणस्वयं ॥ त्रिभिर्वर्षे रामचंद्र स्वप्ने पश्यति मानवः ॥१६१
शठाय कृपणायाथ दंभिकाय सुरेश्वरी ॥ नदातव्यं नदातव्यं नदातव्य कदाचन ॥१६२॥
अभक्तायात्म पुत्राय दातव्यं ब्रह्महा भवेत् ॥ आत्मशिष्याय भक्ताय रामभक्तिपरायच ॥१६३
दातव्यं सुखमाप्नोति सर्वथा सर्वदा प्रिये ॥ एकावृत्तिं पठे देवि धनधान्य संवृद्धिमान् १६४
द्विवारं पठते भक्त्या पुत्रपौत्रादिवर्धनं ॥ तवस्नेहात् प्रवक्ष्यामि मकाराक्षरमुत्तमं ॥१६५
परनिंदा परो नित्यं परस्त्रीगमनं तथा ॥ सुरापीच दुराचारो क्षीयतां गुरुहा भवेत् ॥१६६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्र गृहे सहस्रंच नाम्नां तिष्ठति पार्वति॥ तत्र स्थाने भयं नास्ति भूतवेतालकादिजां॥ ६७

१८ शाकिन्यादि भयं नास्ति रामचंद्र प्रसादतः॥ महानिशायां सततं त्रिपार नियमेन यः॥ ६८॥

कालज्ञान भवेत्तस्य सयोगी नात्र संशयः॥ १६९॥ इति श्री रुद्रयामले पार्वतिहरसं

वादे मकारादि रामसहस्रनाम संपूर्णमस्तु॥ श्रीराम॥ रां रां रां रां रां रां रां रां रां रां

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection